श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ दशावतारस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ दशावतारस्तबकः ॥

दशस्वप्यवतारेषु देवो यद्रूपसंश्रयात्।
साधयामास कार्याणि सतां तस्यै श्रियै नमः॥ १ ॥

देवि त्वदालब्धदयारसेन देवेन मात्स्यं वपुराश्रितेन।
आश्चर्यमष्टश्रुतिरप्यनष्टश्रुतित्वमापद्यत पद्मजन्मा॥ २ ॥

भूयिष्ठां तव दृष्टिरेव कमले भूतिं चिरात् प्रोषितां
भूयोऽप्यानयति क्षणादिति नृणां व्यक्तं घृणावारिधिः।
देवस्तावकदृष्टिरूपमनघं मीनावतारे वहन्
धात्रेऽदत्त सतां श्रियं श्रुतिमयीं दैत्यापनीतां पुनः॥ ३ ॥

सा हि श्रीरमृता सतामिति ननु त्वन्नामधेयाश्रया
त्वद्दास्यं भजति श्रुतिः स्वयमिति प्राप्तादरः श्रीधरः।
तां मग्नां पुनरुद्धरन् जलनिधौ तापार्णवादुद्धरेत्
त्वद्दास्यैकधनाञ्जनानिति रमे धैर्यं चरीकर्ति नः॥ ४ ॥

देवो देवि त्वय्यसौ दानवानां हन्ता हन्तामन्दरागं दधौ यः।
धर्मं कौर्मं धारयंस्त्वत्सहायो मातः सोऽयं मन्दरागं दधाति॥ ५ ॥

उरसि सरसिजालये वहंस्त्वां शिरसि दिधीर्षुरिलां त्वदंशभूताम्।
स्वयमयमचिराद्धुतामरारिः स हरिरुवाह वराहदिव्यरूपम्॥ ६ ॥

दैतेयेन बलात् पयोधिजठरं देवी मही प्रापिता
मातस्ते स्वसृभावमेव यदगादेकोदरस्थानतः।
तस्मादेव कृतादरेण तरसा दामोदरेण स्वयं
दध्रेऽसौ कुहनावराहवपुषा देवेन दंष्ट्राञ्चले॥ ७ ॥

पद्मे चक्रभृतो नृसिंहवपुषः प्रह्लादसंक्लेशन-
क्रूरापुण्यहिरण्यदेहदलनावेलातिवेलोदयः।
रोषाग्निः शमितस्त्वया बत पयोराश्येकशोष्योऽपि तत्
पुत्र्या शक्तिरुदेति कारणगता प्रायेण कार्येष्वपि॥ ८ ॥

शरण्यभूतां श्रुतिरिन्दिरे यां हिरण्यवर्णां हरिणीमभाणीत्।
सा दिव्यसिंहस्य हिरण्यभेत्तुर्निःशङ्कमङ्के रमसे कथं त्वम्॥ ९ ॥

अवनमेव सदा कलयन् गजव्यसनभङ्गकृदद्भुतकेसरी।
हरिणलक्षणदृष्टिरयं त्वयाप्यबलयाम्ब गुणेन वशीकृतः॥ १० ॥

हर्यक्षोऽयं हरिरिति वचस्त्वस्य नाभूतपूर्वं
न प्रह्लादोपचयकरता नो हिरण्याङ्गदत्वम्।
तस्मादस्मज्जननि परमं विस्मयं ते विधातुं
नाथोऽपूर्वं किमिह जगृहे नारसिंहं शरीरम्॥ ११ ॥

तत्तादृक्षहिरण्यदाननिरतौ भक्ताभिरक्षाकृते
सत्कीर्तिं हरितां मुखे खलजनत्रासावहामाश्रितौ।
किञ्चोदञ्चदनेकपापहरणक्रीडोचितालोकनौ
देवि स्तौमि मिथः समानचरितौ दिव्यौ युवां दम्पती॥ १२ ॥

वक्षःस्थामपि वर्णितानुसृतये कृष्णाजिनेनावृणोत्
देवस्त्वामिति वर्णयन्ति कतिचिद्ब्रूमो वयं त्विन्दिरे।
भव्यं वामनरूपमेत्य भगवान् भाग्यं हरिष्यन् बलेः
एनं कर्तुमगोचरं शुभपुषां त्वद्वीक्षितानामिति॥ १३ ॥

वर्णित्वमर्णवसुते वहतापि गूढं
वक्षःस्थले न निहिता वनमालिना चेत्।
कस्त्रीण्यदास्यत पदान्यपि याचतेऽस्मै
कस्माज्जगत्त्रयतया च विवृद्धिरेषाम्॥ १४ ॥

दैत्यादेत्य हि कुप्रतिग्रहमहो वृद्ध्या च पुष्णंस्तनुं
गोत्रघ्नावरजो मृषावटुरधःपातं च दातुर्दिशन्।

वामाकारमगादघावलिहृतो हृद्यम्ब ते धारणाद्
    धात्रा सञ्जगृहे तदस्य शिवतासम्पादकं पादकम्॥ १५ ॥

वासस्ते क्व वटो गुहास्वशनमप्याकाङ्क्षितं ते घनं
    मां जानीह्यघनाशनादरमये किं ते विवाहे स्पृहा।
मा स्त्री मे दिश गां पदत्रयमितां लोकत्रयी सा ममे-
    त्युक्तीर्दिव्यवटोर्निशम्य तदुरस्यम्ब त्वया सिष्मिये॥ १६ ॥

श्रीमान्निःस्व इवैष वामनतनुः प्रत्यग्रहीद्गां कृता-
    वित्थं दुग्धपयोधिजे तव परीहासोक्तिभिर्लज्जितः।
अंशेनार्पितसन्निधिर्भृगुपतौ पूर्वावतारार्जितां
    तामेनां पुनरध्वरे स भगवान्नूनं ददावृत्विजे॥ १७ ॥

बाहाकल्पे भृगुकुलपतेर्वज्रकल्पे कुठारे
    सङ्ग्रामेषु त्रियुगसखि ते सन्निधानं भजन्त्याः।
क्रोधोन्मेषक्षपितविमतक्षोणिपश्रेणिलक्ष-
    ग्रीवोत्थासृग्घुसृणमसृणं गात्रमत्यर्थशोणम्॥ १८ ॥

बिभ्राणे स्वधितिं समिद्धरणतो मन्युप्रपोषक्षमं
    लोकेशास्त्रविचक्षणे नृपकुलेज्याकर्मसंस्थाकरे।
भेजाते ननु दुर्घटार्थघटिनि त्वद्वीक्षणाद्भार्गवे
    सामानाधिकरण्यमर्णवसुते ब्राह्मण्यराजन्यते॥ १९ ॥

पञ्चास्यत्वजुषा पुरा भगवता योऽसौ हिरण्यासुरः
    पञ्चत्वं गमितः स एव जननि स्पर्धाभिवृद्धाग्रहः।
भूत्वा तद्द्विगुणाननो जितजगद्भूयस्त्वदागोऽग्निना
    दग्धो हन्त चतुर्मुखास्त्रनिहतोऽप्येकाननस्य प्रभोः॥ २० ॥

सप्ताश्वान्वयशालिना दशरथप्राप्तोदयेनापि ते
    नेत्रापत्तिविवर्जितेन कमले मुक्तद्विपेन्द्रेण च।
निस्सङ्ख्याश्वकुलो रथायुतयुतो निःसीमपत्तिच्छटः
    त्वद्द्रोहादगणेय कुञ्जरगणोऽप्यस्तो रणे रावणः॥ २१ ॥

रघुवरकृतशङ्काभङ्गदम्भेन लङ्काऽऽ-
    मिष भुगशुचि सद्मा स्वादनैः कृष्णवर्त्मा।
अशुचिरिह भवत्या पावितो देवि सत्या
    स वहति शुचिसंज्ञां तद्वदन्त्यन्यथाज्ञाः॥ २२ ॥

अखण्डं कोदण्डं प्रभुरदलयत् खण्डपरशोः
    अगृह्णाद्रामस्य प्रसभमपि चाखण्डपरशोः।
अबध्नादप्यम्भोनिधिमथ दशग्रीवमवधीन्
    महाश्चर्याश्चर्यास्त्वयि कृतधियोऽस्याम्ब सुकराः॥ २३ ॥

सङ्कल्पतस्तव समीरसुते हि सीते
    शीतो बभूव दहनश्चिरमेधमानः।
मातर्जगद्भ्रमनिवृत्तिकृते विशन्त्यां
    शीतः कुतः स न भवेत्त्वयि देवि साक्षात्॥ २४ ॥

नीलाम्बरो हलधरो ननुहन्त भास्व-
    द्भूभेदनैकरसिकः शुभशालिवृत्तिः।
श्यामाकलाभरत एष विवृद्धमोहो
    भोगी बभूव भुवनाम्ब तव प्रसादात्॥ २५ ॥

श्यामा त्वमम्ब दयितश्च तवैव कृष्णो
    गाङ्गेययोगमुदिता स च रुक्मिणीशः।
त्वं स्वादुवाक् स च युवा मधुरोदितश्री-
    र्दाम्पत्यमेतदनुरूपमतो मिथो वाम्॥ २६ ॥

रामानुषङ्गविहृतौ रचिताभिलाषं
    मातस्त्रिलोचनजितं भवती मनोज्ञम्।
पित्रा समानगुणमात्मभुवं प्रसूय
    पुष्पायुधं कमपि रुक्मिणि लब्धहर्षा॥ २७ ॥

गम्भीर भावाहि कृतार्थक्लृप्त सम्पन्नटीका श्रुतिमञ्जुसूक्तिः।
गीतेव कृष्णाननसौरभज्ञा ध्येयासि मातः शुभयोगभाजाम्॥ २८ ॥

घनमहा नवनीतसुधाश्रितव्रजविपत्तिहरा हरिवल्लभे।
प्रबलभद्रविकासविधायिनी त्वमयसे निजवल्लभतुल्यताम्॥ २९ ॥

प्रायोध्यानगरीयसां सुमनसां मायातमश्छेदिनी
त्वं काञ्चीमधुरावलम्बसरणिः क्षोभादवन्ती जगत्।
सम्भोगैः स्वदसेऽस्य देवि जलधेरुद्दीचिकाशीकरैः
स्वैरं द्वारवतीपुरे विहरतेऽतृष्णाय कृष्णाय तैः॥ ३० ॥

म्लेच्छान् भयानकरवानपि मूर्च्छयित्वा
निर्वापयिष्यति कलिं हरिरध्वरं च।
कल्की तमांसि परिपास्यति भूसुरांश्च
पद्मे भवद्वचनपल्लवितानुकम्पः॥ ३१ ॥

मलिनकलिकालेशैः शाखापरिक्षयदूषितैः
अपगतसदामोदैरत्रासुहृद्व्यवनैर्वृते।
शमयितुमनाः शाखिग्लानिं भविष्यति माधवो
जलनिधिभुवा वृद्धिं लब्ध्वा त्वया च महावनी॥ ३२ ॥

प्रातर्वात इवावधूतकलिको मातर्महारण्यवत्
खड्गी तापसवत्कृतार्थजननः कल्की मुदे देवि ते।
अम्लेच्छां स्वयमाचरिष्यति महीमान्ध्रीयजिह्वामिव
स्वामी सश्रुतिमार्गगानिहजनान्कर्ताथ शब्दानिव॥ ३३ ॥

मात्स्यज्योतिषि मन्दरक्षणपरेऽनन्तोच्चदर्पावहे
हर्यास्यस्पृशि चारुवर्णिनि कृताशेषाधिकोपक्रिये।
एणश्रीमुषि कामपालविभवे कृष्णे कलिध्वंसने
देवि त्वद्दयितावतारदशकं ध्यायाम्यपाङ्गे तव॥ ३४ ॥

कृष्णः केशो दृगेषा झषतनुरधरोमन्दरागं हि धत्ते
सौकर्यं दोष्णि रेजे किल मुखहरिता मध्यमात्ता वलिश्रीः।
रामाग्र्यत्वं वपुः श्रीः प्रथयति यमुनादर्पहृद्रोमवल्ली
धत्ते जङ्घाभिरामश्रियमिह कलिहृत्पादपद्मं तव श्रीः॥ ३५ ॥

विदितगुणालङ्करणं विशिष्टरचनाविचक्षणप्रेक्षम्।
कविमिव कृतदशरूपकमरविन्दगृहेऽभिनन्दसि मुकुन्दम्॥ ३६ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे दशावतारस्तबकः ॥